CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 786

Title Madanapārijāta

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 788 Subject: Dharmasāstra

Title: Madanapārijāta. 8th stabaka.

Author: Viśveśvara. Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 10.6" by 6" Extent: 288 to 311 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Begins & Ends abruptly.

दौ त्यादिमंत्रद्वयं पठंतीत्यर्थः ॥ याम्योदक्षु खेषु दर्भेषु स्वपेत्पश्चाद् दक्षु खः अमावास्यायां अजीवत्पितृकस्ततः परं ॥
हुतोन्नमासदर्शाभिः क्षुरये कक्षुमात्रयं कुर्यान्मासिकं मासिसपिंडीकरणं ततः ॥ आशौचांत ततः सर्वमा
मा नैवापरस्य ॥ कुर्याद्दक्षिरतां नाचाधानयारोप्य धनायुषं ॥ अमावास्यायां व्यतीतायां कुर्यादित्यादि
धायपुनरप्याशौचं इत्यभिधानात्कुक्षं ॥ अमावास्यायां व्यतीतायां अतः परमाशौचांतपर्णशावाशौचं
वत्रिरात्रांतश्राद्धादिकं कुर्यादित्यवगम्यते ॥ एतदध्याहारसापेक्षं चात् ॥ आशौचांतं इत्यादि ॥ कस्यो
पसंहाररूपत्वेनानुवादोपपत्तेः ॥ छक्कपक्षस्याश्राद्धस्याप्रशस्तत्वात् ॥ कृष्णपक्षे च प्रशस्तत्वात्त्र्याप्यमावा
स्यायां प्रशस्तत्परत्वेनामावास्यापूर्वदिने एवाशौचनित्यमावास्यैवाशौचांतः ॥ अतस्तत्रैव श्राद्धं कुर्यात् ॥
॥ छ ॥ ॥ इह मदनपारिजातमदनादित्यपालदानजलरूढेर्वकस्तम आसीद्रामो राजलक्ष्मपंडित
न्नमरताम्रीयैषांशास्त्रे प्रकृतिमरणीयाद्यवकृतिः परारीतं श्लाघ्यं जगति जवस्ते कतिपयैर्विरंचिते

शंखुकरतलन्यूतास्थितिमियादियं व्यासारण्यप्रवरमुनिशिष्यस्यनलतिः ॥ इति पंडितपारिजातवक्षा
रमल्लेत्यादिविरुदराजीविराजमानपारिजातस्य निबंधे मदनपारिजाते निर्णये सप्तमस्तबकः ॥ छ ॥ ॥
विभक्तानामेव पृथक् पृथक् श्राद्धाधिकारात् ॥ श्राद्धस्तबकानंतरं दायविभागो निरूप्यते ॥ तत्र ना
रदः ॥ विभागोर्थस्य पैत्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ॥ दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥ पैत्र्यस्येति
पितामहादेरप्युपलक्षणं ॥ तदिति विधेयविशेषणं ॥ तत्र कालो विभागस्य जीवत्येव पितरि पित्रि
र्य्यदा विभागेच्छा स तावदेकः कालः निवृत्तरजस्कायां मातरि स्त्रीसुखवान्निवृत्ताभिलाषे पितरि स्पृहे चपि
तरि पुत्रेनिच्छायामपि यदा पुत्रेच्छा सोन्यः रजस्कायामपि मातरि अनिच्छत्यपि पितरि तस्मिन् दृष्टे च अध
र्मवृत्तिनि अचिकित्स्यरोगग्रस्ते वा सति यदि पुत्रेच्छा सोन्यातरः ॥ पितृमरणानंतरमपर इति तत्र प्रथम १८ पाश्री ॥
पक्षमाह ॥ याज्ञवल्क्यः ॥ विभागं चेत् पिता कुर्यादिच्छया विभजेत् सुतान् ॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे

तथा ॥ वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः ॥ योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥ वस्त्राणामविभा
ज्यत्वं धृतानामेव एवं वाहनमपि [illegible] दीत दपि यद्य[illegible]स्य नियमेन वाहनसाधनं ॥ तन्नवि[illegible]ज्यं ॥ अपि
वा पत्रशब्देन लेख्यनिविष्टधनपरः ॥ तथा च कात्यायनः [illegible] लिखित [illegible] मिति तच्छास्त्रवचो ॥ अ
त्र विभाज्यमित्यनुवर्तते ॥ कात्यायनः ॥ धनं पत्रनिविष्टमिति ॥ अत्रा[illegible]यमभिप्रायः ॥ भावत्यत्र निविष्टं च
र्णेन ध्रियते तावदविभाज्यमिति ॥ अथवा [illegible] प्रकारा विज्ञेयः ॥ [illegible] विभजनीयं तदन्यथानर्थ
क्यं नावत् ॥ विक्रीय वस्त्राभरणमृणं ग्राह्य लेखितं ॥ कृतान्नं च कृतान्नेन परिवर्त्य विभज्यत इति ॥ उच्चा
दि [illegible] योपजीविनो विभज्यमेवाय [illegible] दिविषमत्वेनाविभाज्यं तत् ज्येष्ठस्य [illegible] ॥
अविकं त्वेकशफं न जाच विषमं न जेत् ॥ न तत्क्रेयं न दातव्यं [illegible] मानाः पतंति ते ॥ अत्र धृतत्वं नाम प्रीतिदाना
दिना प्रातिस्विकस्वत्वोपेतत्वं कृतान्नं तंडुलमोदकादि तद्यथा संभवं सर्वैः [illegible] नोक्तव्यां उदकं तु [illegible] तै १

१त् धारा कूपादिष्वत्र दायें विषममेव न विभाज्यं किंतु पर्यायेण भोक्तव्यं त्रिधा॥ दास्यः अवरुद्धाश्च तत्र विषमसं
ख्याके दास्यः पर्यायेण कर्म कारयितव्याः ससंख्याका विभाज्याः॥ अवरुद्धाः समा अपि न विभाज्याः॥ यदाह
गौतमः॥ स्त्रीषु च संयुक्तास्व विभाग इति संयुक्तास्ववरुद्धास्व योगक्षेमं अलब्धलाभो योगः॥ अलब्धला
भहेतुभूतं श्रौतस्मार्ताग्निसाध्यमिष्टं कर्मशब्दयोगेन लक्ष्यते॥ लब्धपरिलक्षणं क्षेमः॥ लब्धलक्षणका
रणभूतं बहिर्वेदि दानतटाकारामनिर्माणादि पूर्तं कर्म क्षेमशब्दे न लक्ष्यते॥ एतदुभयं पितृका
पि न विभाज्यं॥ पितृद्रव्यविरोधोपार्जितमपि न विभाज्यं॥ क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः॥ अवि
भाज्ये च ते प्रोक्ते शयनासनमेव चेति लौगाक्षिस्मरणात्॥ योगक्षेमादिकारिणो मंत्रिपुरोहितादयो यो
गक्षेमशब्देनोच्यंत इत्यन्ये॥ शस्त्रचामरछत्रोपानत्प्रभृतय इत्यपरे॥ प्रचारो गृहग्रामादिप्रवेशनिर्ग ३०ली मी॥
ममार्गः॥ अस्मिन्प्रकरणे विषमत्वं नामांशदानापर्याप्तत्वं न च कन्यादिसंख्यादि॥ तद्यथा॥ चत्वारः पुत्राः

वसुः समांशिनः॥ श्रेष्ठादिभाग समनुनादर्शितः॥ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं॥ ततोऽर्धं म
त्र ध्यमस्य स्यात्तुरीयं तु यवीयसः॥ अस्यार्थः॥ विभज्यद्रव्ये विंशतितमो भागः सर्वद्रव्येषु श्रेष्ठं तं ज्ये
ष्ठाय दातव्यं॥ तथा॥ चत्वारिंशत्तमो भागो मध्यमस्य च मध्यमाय अशीतितमो भागो हीनद्रव्यं कनि
ष्ठाय दातव्यं॥ ततो वशिष्टद्रव्यं समं विभजनीयादिति॥ एवमन्यान्यपि विषमभागप्रतिपादकानि गौ
तमादिवचनानि बहूनि संति॥ तानि ग्रंथविस्तरभयान्नेह प्रदर्शितानि॥ एवं विषमभागस्य शास्त्रसिद्धत्वे
पि लोकविरुद्धत्वादस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्नत्विति वचनादयं विभागक्रमो नानुष्ठेयः॥ स्म
र्यते॥ यथा नियोगधर्मान्यो नानुबंध्या वधोपि वा॥ तथोद्धारविभागोपि नैव संप्रति वर्तते॥ यदि दैवात
पिता कश्चिद्विषमभागं तदानीं निवर्तते॥ इत्याह याज्ञवल्क्यः॥ न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृ
तः॥ धर्म्यः यदि धर्मादनपेतः स्यात्तर्हि न निवर्तते इत्यर्थः॥ अधर्म्यश्चेन्निवर्तत इत्युक्तं भवति॥ तथाच

नारदः॥ अन्यथा शास्त्रनारीच॥ नविभागे पिता प्रभुरिति॥ यत्र च विषमविभागे लोकविद्वेषनावास्तत्र विष-
मविषमविभागो नवत्येव॥ यथाह नारदः॥ द्वाविंशो प्रतिपद्येत विभजन्नात्मनः पिता॥ इति तत्रश्च स्वतंत्रोपार्जी-
कपरं॥ यदाह वशिष्ठः॥ येन चैषां स्वयमुपार्जितं स्यात् स द्व्यंशमेव लभेतेति॥ येषां दायार्हं पितृत्वान्वादीनां द्वि-
तीयं पक्षमाह॥ विभजेयुः सुतं सम मित्यनुवृत्तौ नारदः॥ मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च॥ निवृत्ते
वापि रमणे पितर्युपरतस्पृहे॥ प्रत्तास्तु विवाहितासु॥ रमणं स्त्रीसंयोगः॥ शेषं॥ तदिच्छा निवृत्तौ सत्यामि-
त्यर्थः॥ स्पृहाद्व्यविषया तृतीयं पक्षमाह॥ शंखः॥ अकामे पितरि रिक्थविभागे वृद्धे विपरीतचेतसि रोगि-
णि च इति॥ अकामे अनिच्छौ विपरीतचेतसि अधर्मवर्तिनि॥ चतुर्थं पक्षमाह॥ धर्मान्वाह॥ विभजेरन् सुताः पि-
त्रोरूर्ध्वं रिक्थमृणं समं पित्रोर्माता पित्रोरूर्ध्वं स्वकृतं तदीयद्रव्यं तदीयमृणं च समं विभजेरन्नित्यर्थः॥ पितृ
मरणानंतरं पातित्यादि दोषयुक्ते वापि तरि जीवति यदा पुत्रा एव विभागकर्तारस्तदा विशेषमाह स एव॥ २८धीश्री॥

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥ भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं॥ असंस्कृ-
तानां विवाहांत संस्कारैः संस्कृतानां भ्रातृणां भगिनीनां च विवाहांत संस्कारैः कृत्वा पश्चाद्विभागः कर्त-
व्य इत्यर्थः॥ भगिन्यश्चेत्यादेरयं तात्पर्यार्थः॥ भगिनीनामविवाहितानां विवाहं कुर्वीरन् चतुर्थमंशं ता २
दद्युः कस्मान्निजादंशात्॥ अनुजातीय पुत्रस्यांशाः चतुर्थो भागस्तस्मै रिति वक्ष्यमाणे स्वों-
शो निजांशः॥ तस्मादयं विभाग क्रमः ब्राह्मणस्यैव चैका पत्नी तत्पुत्रोप्येक एव एका च कन्या॥ तत्र पि-
तृद्रव्यं द्वेधा विभज्य तन्मध्य एकमंशं चतुर्धा विभज्य चतुर्थमंशं कन्यायै दत्वावशिष्टं पुत्रो गृह्णी-
यात्॥ यदा पुत्रौ द्वौ कन्या चैका तदा पितृद्रव्यं त्रेधा विभज्य तत्रैकमंशं चतुर्धा विभज्य तुरीयांशं क-
न्यायै दत्वावशिष्टं द्वावपि पुत्रौ वंटयित्वा गृह्णीतां॥ एवं बहुपुत्रत्वे कन्याबहुत्वे चोहनीयं॥ यदैकः
पुत्रो द्वे च कन्ये तदापि द्रव्यं त्रेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य एकमेकं चतुर्थांशं कन्याभ्यां

नारदः॥ अन्यथा शास्त्रनारीत्व न विभागे पिता प्रभुरिति॥ यत्र च विषमविभागे लोकविद्वेषता वा तत्र विष
मविषमविभागो न भवत्येव॥ यथाह नारदः॥ द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता॥ इति तच्च स्वतंत्रोपार्जी
कपरं॥ यदाह वसिष्ठः॥ येन चैषां स्वयमुपार्जितं स्यात् स द्व्यंशमेव लभेतेति॥ येषां दायार्हपितृभ्रात्रादीनां द्वि
तीयं पक्षमाह॥ विभजेयुः सममित्यनुवृत्तौ नारदः॥ मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च॥ निवृत्ते
वापि रमणे पितर्युपरतस्पृहे॥ प्रत्तासु विवाहितासु॥ रमणं स्त्रीसंयोगः॥ शेषं॥ तदिच्छानिवृत्तो सत्यामि
त्यर्थः॥ स्मरणाद्व्यविषयात्तृतीयं पक्षमाह॥ शंखः॥ अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगि
णि च॥ इति॥ अकामे अनिच्छौ विपरीतचेतसि अधर्मवर्तिनि॥ चतुर्थं पक्षमाह॥ यदीतवतः॥ विभजेरन् सुताः पि
त्रोरूर्ध्वं ऋक्थमृणं समं पित्रोर्मातापित्रोरूर्ध्वं तदूर्ध्वं तदीयद्रव्यं तदीयमृणं च समं विभजेरन्नित्यर्थः॥ पितृ २८णीश्री॥
मरणानंतरं पातित्यादिदोषयुक्ते वा पितरि जीवति यदा पुत्रा एव विभागकर्तारस्तदा विशेषमाह स एव॥

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥ भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं॥ असंस्कृ
तानां विवाहांतसंस्कारैः संस्कृतानां भ्रातृणां भगिनीनां च विवाहांतसंस्कारैः कर्त्तव्यः आदिभागः कर्त्त
व्य इत्यर्थः॥ भगिन्यश्चेत्यादेरयं तात्पर्यार्थः॥ भगिनीनामविवाहितानां विवाहं कर्तुं स्वस्वचतुर्थमंशं ता २
दद्युः॥ कस्मान्निजादंशात्॥ स्वजातीयपुत्रस्य योंशः तच्चतुर्थो भागस्तस्य रितिवक्ष्यमाणः सों
शो निजांशः॥ तस्मादयं विभागक्रमः ब्राह्मणस्यैव वैकापत्नीतत्पुत्रोप्येक एव॥ एका च कन्या॥ तत्र पि
तृद्रव्यं द्वेधा विभज्य तन्मध्ये एकमंशं चतुर्धा विभज्य चतुर्थमंशं कन्यकायै दत्वावशिष्टं पुत्रो गृह्णी
यात्॥ यदा पुत्रौ द्वौ कन्या चैका तदा पितृद्रव्यं त्रेधा विभज्य तत्रैकमंशं चतुर्धा विभज्य चतुर्थांशं क
न्यायै दत्वावशिष्टं द्वावपि पुत्रौ चत्वारोंशान् गृह्णीतः॥ एवं बहुपुत्रत्वे कन्याबहुत्वे चोहनीयं॥ यदैकः
पुत्रो द्वे च कन्ये तदा पितृधनं त्रेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य एकमेकं चतुर्थांशं द्वाभ्यां कन्या

कार्यो दत्त्वा विशिष्टमखिलं पुत्र एव हरेदिति॥ एवमेव समानजातीयेषु भ्रातृषु भगिनीषु संख्या वैषम्ये च
यो जनीयं। यदा जाति वैषम्यं संख्यासाम्यं वैषम्यं वा तदेवं द्रष्टव्यं। तद्यथा ब्राह्मणस्य ब्राह्मण्यादि भा
र्यासु तत्र ब्राह्मणीपुत्रः। कन्या च तथा क्षत्रियापुत्रः कन्या च॥ तथा वैश्यायाः। शूद्रायाश्च एवमष्टाव
पत्यानि तत्र चत्वार्यपत्यानि। स्त्रियश्चत्वारः पुमांसः। चतुस्त्रिद्व्येकेन भागास्तु इति वचनेन ब्राह्मण्य
पत्ययोरष्टावंशाः क्षत्रियापत्ययोः षट् वैश्यापत्ययोश्चत्वारः शूद्रापत्ययोर्द्वौ एवं विंशति भागा
न् कृत्वा ब्राह्मणीकन्यायै स्वजातिपुत्रविहिताष्टांशचतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं दद्या
त्॥ वैश्यकन्यकायै स्वजातिविहितांशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्॥ शूद्रकन्यकायै
स्वजातिपुत्रविहितादेकांशरूपादेव निजाद्भागाच्चतुर्थमंशं दद्यात् भागादवशिष्टं द्रव्यमेकैक २८॥श्री॥
त्र ब्राह्मण्यादिपुत्राः क्रमाच्चतुस्त्रिद्व्येकभागान्हरेयुः॥ भ्रातृणां भगिनीनां च वैषम्ये यावतो

व्यक्तयो ब्राह्मणादीनां तावन्तोंऽशान् तत्तज्जात्यनुसारान् चतुस्त्रिद्व्येकभागादिक्रमेण कल्पयित्वा कन्यकानां
स्वस्वजातिविहितान्॥ भागाच्चतुर्थमंशं दत्त्वा अवशिष्टं च भागाद्द्रव्यं सर्वे पुत्राश्चतुस्त्र्यादिक्रमेण विभ
ज्य गृह्णीयुरित्येवं योजनीयं। केचनैवं मन्यन्ते स्वोत्कर्षोत्पत्त्या चतुर्थमंशं कन्यकायै दत्त्वा तेनैव विवाहः॥
कर्तव्यो न तु समुदितद्रव्येण विवाहं कृत्वा पुनरपि चतुर्थांशदानमिति। तन्मेधातिथिमिताक्षरादीनां
मतविमतत्वादुपेक्ष्यं॥ अथवा देशाचारतो व्यवस्था॥ दत्तविभागप्रसंगागतं चेत्येतदुक्तं नि
रूपितं॥ सांप्रतं दायग्रहणव्यवस्थां दर्शयितुं मुख्यगौणपुत्रान् प्रदर्शयति॥ तत्र याज्ञवल्क्यः औरसो ध
र्मपत्नीजः तत्समः पुत्रिकासुतः॥ क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु
सुतः स्मृतः॥ कानीनः कन्यकाजातो मातामहसुतो मतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः॥ दद्यान्मा दतायो २
ता पिता वा यं स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः॥ दत्तात्मा तु स्वयं

दत्तोगर्भेविन्नःसहोढजः॥ उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः॥ पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरः॥
सजातिष्वयंनोक्तःसूनयेषुमयाविधिः॥ सवर्णाधर्मविवाहोढाधर्मपत्नीस्यांजातःपुत्रऔरसः॥ मनु त२ दि
रव्यः॥ तथाअङ्गिरादिविवाहोढासवर्णापुत्रो॥ पितयाअनुलोमविहितक्षत्रियास्त्रीपुत्रश्चालगाउत्पन्नोप्र
ह्रीवसिक्तोब्राह्मणेनिषादापरपर्यायपारशवश्चवैश्यादिक्षत्रियोराज्ञउत्पन्नौमाहिष्योग्रौच॥ ब्रास्यांवैश्या
दुर्ल्यंच्चःकारणकेत्येतेऔरसाएवपुत्रिकापुत्रः॥ पुत्रिकायाःपुत्रइत्यन्यविधोपिपुत्रिकासुतंतत्समओ
ससम॥ तथाकात्यायनेजनकस्यौरससमएव॥ समानवर्णेनसगोत्रेणइतरेणसपिंडेनदेवरेण
नियोगधर्मेणोत्पन्नःक्षेत्रजः॥ अनिश्चितपुरुषविशेषात्॥ सवर्णाच्चेद्गृहेप्रच्छन्नउत्पन्नोगूढजः॥ अ
निश्चितपुरुषविशेषत्वंचेच्चगूढत्वंनस्त्रियः॥ सवर्णविज्ञानंस्त्रीद्वारानयातस्यरूपस्यज्ञातत्वात्॥ पत्रवला २पि॥श्री॥
दूरसिपुरुषांतरसंभोगात्॥ सापिवर्णविशेषंनजानाति॥ तत्रगूढजः॥ नाममात्रधारीनद्वेवेकस्यएवजनयत

शस्त्रः॥ सवर्णाकन्यकायामुत्पन्नःकानीनःसमातामहस्तुतः॥ यदिसाअविवाहितापितृगृहएवतिष्ठ
ति॥ यदिवोढाविवाहितातदास्यपुत्रोवोढुरेव॥ तथाचमनुः॥ पितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः॥ तंका
नीनंवदेन्नाम्नावोढुःकन्यासमुद्भवं॥ अत्रवोढुरित्युपादानात्विवाहिताचेत्तदावोढुर्नोचेत्॥ माता
महस्यैवेत्यवगम्यते॥ क्षताक्षतावेतिद्विविधापुनर्भूःतस्यांसवर्णादुत्पन्नःपौनर्भवः॥ दत्तकोपिसवर्णए
व॥ यदाहमनुः॥ मातापितावादद्यातांयमद्भिःपुत्रमापदि॥ सदृशंप्रीतिसंयुक्तंसज्ञेयोदत्रिमःसुतः॥
सदृशंसवर्णेनजातिमोचितेस्मृतेवाक्यापदिकन्यामात्रस्याधिकारारादानेतथामातुरिष्टत्वयोःप्तुर्माद्दिदोष ६४
पुत्रकार्यावादिकेवलंपितुरधिकारः॥ अन्यथातयोरपिसदैवआपादीत्यापद्ग्रहणोपादानादनापदि॥ न
देयमितिगम्यते॥ अनापदिदत्तेदातुर्दोषोनप्रतिग्रहीतुः॥ एकपुत्रोनदेयोनापिप्रतिग्राह्यःस्त्यांवसि ६२
ष्ठः॥ नात्वेकंपुत्रंदद्यात्प्रतिगृह्णीयाद्वेतितथाज्येष्ठापिनदेयः॥ पुत्रप्रतिग्रहप्रकारमाह॥ वसिष्ठः॥ पुत्रंप्र

।तिगृहीष्यन्नबंधूनाहूयराजनि।।वेद्यनिवेशनस्यमध्येव्याहृतिभिर्हुत्वाद्वूरबांधवंबंधुसंनिकृष्टमेवप्रतिगृह्णी
यादिति।।रुद्रनिवेशनस्य।।स्वगृहस्य।।अंत्यंतादृशनाशाविप्रकृष्टस्यप्रतिषेधार्थमद्वूरबांधवमित्युक्तं।।
अयंचविधिः।।क्रीतःस्वयंदत्तकृत्रिमेष्वपियथायोग्यंयोज्यएवंपुत्रज्येष्ठपुत्रव्यति[illegible]रेकेणआपादिमा
तापितृभ्यांसर्वोकरीत्याप्रत्याप्रत्येकंवायोक्रीतः।।ससवर्णःक्रीतपुत्रः।।यत्तुमनुनोक्तं।।सक्रीतस्तुतस्य
सासदृशोसदृशोथवा।।इतितच्छूद्रैःरुवासदृशोसदृशोवेत्येतत्परं।।नतुब्राह्मणेनेति।।सवर्णोमाता
पितृरहितःसवर्णोधनादिकप्रदर्शनेनप्रलोभितःसत्पुत्रार्थिनायुक्तिकृतोयःसकृत्रिमः।।मातापितृभ्यां
विहीनः।।तत्परित्यक्तोवा।।अहंतवपुत्रोभवामीतिप्राप्तःस्वयंदत्तः।।अत्रापिसवर्णइत्येकेसगर्भोयोवि
वाहितायांतस्माद्गर्भिणीत्ययत्रउत्पन्नःससहोढः।।यदिचसगर्भःसवर्णाजःमातापितृभ्यांत्यक्तःपरि र एरोश्रीग।
त्यक्तःसवर्णोयोगृहीतःपुत्रत्वेनसोपविद्धः।।अत्रक्रमंदर्शयति।।पिंडदोंशहरश्चेतिएतेसवर्णाएवपुत्राभ

वंतीत्याह।।सजातीयेष्वयंविधिः।।एतेद्वेयआद्योद्वादशभिःसवर्णोत्पन्नास्तदापितन्नामधेयभाजोभवंत्ये
वं।।अपितुसवर्णोत्पन्ना[illegible]स्वप्रशस्तारोभवंति।।सजातीयेष्वयंप्रोक्तइतिसजातीयग्र
हमात्।।यदिहीनवर्णोत्पन्नास्तदापिप्रतिलोमजत्वेननिंद्याएवेतिविवेचनीयं।।कानीनगूढोत्पन्नस
न४ होढपौनर्भवानांसवर्णत्वंउंकद्वारेणनस्वरूपतः।।तस्मात्कुंडगोलकत्वेनस्वातावर्णजात्यंतर्भावात्।।पुत्रि
काकारणानंतरमौरसपुत्रोत्पत्तौविशेषमाहमनुः।।पुत्रिकायांकृतायांतुयदिपुत्रोनजायते।।समस्तस्तत्रविभा त्र५
गःस्याज्ज्येष्ठतानास्तिहिस्त्रियः।।शातातपः।।उत्पन्नेत्वौरसेपुत्रेचतुर्थांशहराःसुताः।।सवर्णाअसवर्णास्तु
ग्रासाच्छादनभोजनाः।।सवर्णाश्चेहक्षेत्रजदत्तकक्रीतकृत्रिमस्वयंदत्तापविद्धाः।।असवर्णाःकानीनगूढोत्पन्नस
होढपौनर्भवाः।।यत्तुविज्ञानेश्वरवचनं।।अप्रशस्तास्तुकानीनगूढोत्पन्नसहोढजाः।।पौनर्भवाश्चनैवैतेपिंडरि
क्थांशभागिनः।।इतितदौरसेसतिचतुर्थांशनिषेधपरं।।औरसाद्यभावेतुकानीनादीनामपिसकलपित्रि

धनयत्तएणमस्त्येव स्वर्वीनावेपरः परइतिवचनादिति॥ विज्ञानेश्वरमतं॥ यथायायं क्रमस्तथास्माभिरुपपा पे२
दितं॥ विज्ञानेश्वर टीकायां सुबोधिन्यां दायविभागप्रकरणे यत्तु शाधिकारीस्त्वपिजोनाश भावात्॥ स्व
सदू तार्जनशक्तिभावांशांशं नजिघृक्षति॥ तं प्रत्याह याज्ञवल्क्यः॥ शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया
किंचिद्दसारमपि तस्मै दत्वा विभागः कर्तव्यः॥ एतच्च पुत्रादीनां दायजिघृक्षमा चेदित्येतदर्थं व्याख्याया
स्य विशेषमाह॥ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः॥ यदानि
जीवस्य क्षेत्रयमापुत्रो बीजदानसमये अन्योऽत्र नमपत्यमावयोरिति प्रतिज्ञां करोति तदैव तेनयोर्बीजिक्षे
त्रिणो रिक्थहारी॥ समयाभावे तु क्षेत्रिण एव॥ विभागोत्तरकालजस्तु यस्तु पुत्रं प्रत्याह मनुः॥ ऊर्द्धं विभा
गाज्जातस्तु पित्र्यमेव हरेद्धनं॥ पित्र्यमित्यत्रैकविशेषः अत एवमातापित्रोरिदं पित्र्यं तथा॥ पुत्रैः सहवि २ पैशी॥मी॥
भक्तेन पित्राय स्वयमार्जितं॥ विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः॥ तथा संसृष्टास्तेनायेस्युर्वि

न१

भक्तेतस्तुतैः सह॥ ये विभक्ताः संतः पुनः पित्रा सह संसृष्टास्तैः संसृष्टैः सह विभक्तजो विभजेदित्यर्थः॥
पितरि भ्रातरि वा मृते असंसृष्टभागनीयो मातरि भ्रातृपत्न्यां वा सत्यामन्येषु चासत्सु विभक्तजे सत्सु तस्मादेव
गर्भाद्विभागानंतरमुत्पन्नस्य कथं भागकल्पनेत्याकांक्षायां॥ याज्ञवल्क्यः॥ दृश्याद्वा तद्विभागः स्यादाय द२
व्यय विशोधितात्॥ तस्य विभागः तद्विभागः॥ अन्नं छष्टेन पूर्वोक्तरीत्या विभागानंतरमुत्पन्नं परामृश्यते॥ वि
भागोत्तरदृश्याद्वादृश्यादेव॥ वाशब्दोवधारणे॥ कीदृशात् दृश्यात्॥ आयव्ययविशोधितात्॥ विभाग
नंतरं प्राप्तिस्वित्रांशोः कृष्यादिषु क्रियमाणेषु यो जनि॥ स आयः पितृकृतर्णापाकरणत्वकंडं व्ययोषण
हिकं यदावश्यकं क्रियते स व्ययः॥ आयमंशमध्ये परिगण्य व्ययं चोद्धृत्य सर्वत्र्यो शेष्योयस्माद्दृश्यादंशा
घायथायकरितंता वत्तावक्तृ ही पात्व भागसंभवं कृत्वा पूर्वोक्तरीत्या विभागानंतरमुत्पन्नपुत्रस्यद मर
घादित्यर्थः॥ स्पृहगनीयां भ्रातरि भ्रातृपत्न्यां वा प्रसवानंतरं विभागः कर्तव्यः॥ यदाह वसिष्ठः॥ अथ

धारणं दायविभागो याश्चानपत्यास्त्रियस्तासामापुत्रजन्मादिति॥ तस्मिंश्च गर्भिणीनां स्त्रीणामा
पुत्रजन्मात्॥ आप्रसवात्प्रसवं प्रतीक्ष्य दायविभागो भवतीत्यर्थः॥ विभक्तानंतरं मातापित्रा वा
विभक्ताय पुत्राय जनकरणादिके दीयमाने विभागानंतरमुत्पन्नेन न निषेधः कार्यः॥ तथाच योगीश्वरः॥
पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्॥ विभागात्प्राक्पितामाता वा यस्मै यद्दत्तं तत्तस्यैव समान
न्यायत्वात्॥ अतएवैकस्मै दीयमानेऽन्येन निषेधोऽपि न कार्यः॥ अथ विजातीयपुत्रविभागः॥ तत्र या
ज्ञवल्क्यः॥ चतुस्त्रिद्व्येकभागास्युर्वर्णशो ब्राह्मणात्मजाः॥ क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागि
नः॥ वर्णशो वर्णे वर्णे ब्राह्मणक्षत्रियवैश्यशूद्रजातीयासु ब्राह्मणभार्यासूत्पन्ना ब्राह्मणपुत्राः
क्रमेण चतुस्त्रिद्व्येकभागभाजो भवंतु॥ शूद्रापुत्रांशापेक्षया चत्वारो भागा ब्राह्मणीपुत्रस्य एतदपेक्ष रएविश्री॥
या चतुर्थांशन्यूनत्वात् क्षत्रियापुत्रस्य त्रयो भागाः॥ वैश्यापुत्रस्यार्धन्यूनत्वात् द्वौ भागौ शूद्रापुत्रस्यै

को भागः॥ क्षत्रजाः क्षत्रियात्क्षत्रियवैश्यशूद्रजातीयासु स्वभार्यासूत्पन्नास्ते त्रिद्व्येकभागभाजो या२
ब्राह्मणस्य ब्राह्मण्यां स्वभार्यायामुत्पन्नपुत्रापेक्षयैकांशस्य न्यूनत्वात्क्षत्रियायां॥ क्षत्रियायामुत्पन्न
या३ स्य त्रयो भागाः॥ वैश्यायामुत्पन्नस्य द्वौ शूद्रायामुत्पन्नस्यैकः॥ विड्जा वैश्याः वैश्यशूद्रजातीयस्वभार्ययोरुत्पं
न्नाः॥ अत्र बहुवचनं॥ पुत्रबहुत्वापेक्षया ब्राह्मणस्य ब्राह्मण्यां स्वभार्यायामुत्पन्नपुत्रापेक्षयांशद्वय
स्य न्यूनत्वाद्वैश्यायामुत्पन्नस्य द्वावंशौ शूद्रायामुत्पन्नस्यैकोंशः॥ अनेनैव प्रकारेण पुत्रगतसंख्यासा
म्ये विषमे च योजनीयं ब्राह्मणात्क्षत्रियादिजातीयासु स्वभार्यासूत्पन्नपुत्राः प्रतिग्रहप्राप्तभू 5
भागं न लभंते॥ तथाच निगमः॥ न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै॥ यद्यप्येषां पिता दद्यात् मृते
विप्रासुतो हरेत्॥ प्रतिग्रहणात्क्रियालब्धं लभंते॥ तथा॥ शूद्रां द्विजातिभिर्जातो न भूमेर्भागमर्ह न१
ति॥ द्विजातिमात्रात् शूद्रायामुत्पन्नः प्रतिग्रहक्रियादिलब्धाया अपि भुवो भागं न लभत इत्यर्थः॥ यच्छूद्रापु

त्रस्यांसेंशमात्रनिषेधकं वचनांतरं॥ ब्राह्मणक्षत्रियविशां शूद्रपुत्रो न रिक्थभाक्॥ यदेवास्य पिता दद्यात्तदेवास्य धनं भ
वेत्॥ इति तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि यद्दत्तं तदा विभागकाले आत्मनिर्दात्त योंश इत्येतत्प
रं पित्राऽदत्ते चेदंशभाक्॥ वमस्त्येव शूद्रा दास्यामुत्पन्नस्य विशेषमाह॥ याज्ञवल्क्यः॥ जातोपि दास्यां शूद्रेण कामतोंशह शूद्रेण२
रो भवेत्॥ मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं॥ अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते॥ कामतः पितुरिच्छा
यांशहरो भवेत्॥ यदि पितांशं ददाति तदांशो लभ्यत इत्यर्थः॥ अर्धभागिकं विवाहितापुत्रास्त्वंस्त्वांशार्धभाजं कुर्यु
रित्यर्थः॥ अभ्रातृकः विवाहितापुत्ररूपभ्रातृरहितः सर्वं पितृधनं गृह्णीयात्॥ यदि परिणीता दुहितरस्तत्पुत्रा वा
न संति॥ तत्सद्भावे त्वर्धांशभाग एव दासीपुत्रः॥ शूद्रेणेति विशेषोपादानात्॥ द्विजातिभ्यो दास्यामुत्पन्नस्य न केना
पि प्रकारेणांशः॥ अपितु ग्रासाच्छादनमात्रं भवति स इति निर्णयः॥ ॥अथ पितामहधने पौत्रविभागः॥ तत्र २९पा॥श्री॥
याज्ञवल्क्यः॥ अनेकपितृकाणां तु पितृतो भागकल्पना॥ अनेकेभ्यो भ्रातृभ्यस्त्वत्र कार्यास्तत्कल्पना॥ अनेकपितृकाः

भ्रातृजा इत्यर्थः॥ तेषां स्वस्वपितृद्वारेण पैतामहधनस्य भागकल्पना॥ अयमभिप्रायः॥ त्रयो भ्रातरस्तत्रैकस्यै
कः पुत्रोऽपरस्य द्वावन्यस्य त्रयः पुत्राः एवं षट् एते पितामहधनं षोढा विभज्य न गृह्णीयुः॥ अपितु पैतामहधनं
भ्रातृणां त्रेधा त्रेधा विभज्य एकस्यैकपुत्रः स्वपित्र्यंशं लभते॥ यस्य द्वौ तावपि स्वपित्र्यंशमेव लभेते॥ एवमन्यत्रा
पीति॥ पुत्रोत्पत्त्यनंतरं केषुचिद्भ्रातृषु मृतेषु केषुचिद्विद्यमानेषु भ्रातॄणां भ्रातृपुत्राणामपि पूर्वोक्तरीत्येव
विभागः॥ भ्रातरः स्वांशं भ्रातृपुत्राः स्वस्वपित्र्यंशं लभंते॥ इत्यर्थः॥ पितामहद्रव्येपि पित्रा सह विभागे विशेष
माह॥ स एव॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा॥ तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥ नि
६३ बंधपदिकानिबध्यत इति निबंधः एकस्यां पर्णवाटिकायां इयंति पर्णानि भवंति एकस्यां क्रमुकवाटिकायामियं
ति क्रमुकफलानि भवंतीति॥ तथा व्यापारकोविदैः संख्यया पर्णभारकादिकं निबध्यत इति निबंधः॥ द्रव्यं प्रति
ग्रहविजयव्यापारकृष्यादिभिरुपार्जितं सुवर्णरजतादि तस्मिन् समस्ते पैतामहधने पितुः पुत्रस्य च स्वाम्यं सम

३७ पौत्राणांमंवंशसंबंधो घटत इति पितृकारणानंतरं पौत्रादिना ३७

मेवा॥ अतो जीवति पितरि पित्रिच्छयैव विभागः॥ पितृद्रव्यवंशेऽपि पितुर्विभागश्रुत्यादिनियमान संतीत्यर्थः॥ द्र
व्यादाप्यात्तत्वन्नस्य पौत्रस्याप्येवमेव स्वाम्यं परं तु विभागे विशेषः सच विशेषोऽनंतरपुत्रविभागप्रकरणेनो
करीत्यावेदितव्यः॥ नन्वनेकपितॄणां पित्रातामाकल्पनेत्यनेन पैतामहधनस्य पितृद्वारा भागकल्पनेत्युक्त
रूपत्वेकं कृत्वा पितामहोपात्तेत्यनेनैव पितापुत्रयोः॥ पैतामहधने सममेव स्वाम्यमित्युक्तत्वात्॥ अतः द्र
वीपरविरोधः इति चेत् मैवं॥ अनेकपितृकाणां तु पितृतो भाग इत्येतत् पितरि मृते पुत्राणां पैतामहधनभागविषयं॥ एत
दुक्तं भवति पितृतो भागकल्पनेत्यनेन धनपादनयोग्यता पितृद्वारा एव पौत्राणां मे वंशसंबंधो गम्यते॥ एतच्च
पितरि विद्यमाने न घटते॥ तस्यापि जन्मनैव स्वत्वात्॥ पितरि मृते तु मरणादेव तस्य स्वत्वनिवृत्तेः पितामह
धनविभागप्रकारः॥ अनेकपितृकाणामित्यनेन वचनेन नियम्यते॥ द्रव्ये पितामहोपात्ते इत्येतत्तु पितापुत्र नर एवंद्वाभ्याम्॥
योः विद्यमानयोः पौत्रायेच्छया पैतामहधनविषयं॥ एतच्च पितृपुत्रस्य स्वेच्छयेत्यनेन नोशेनयोजनात्॥ मृतस्य

सैकर स्वाम्यात्ताद्यावादन्यतरमृतावपितत्रस्यास्सदृशं स्वाम्यं पितुः पुत्रस्यैव वहि॥ इत्यनुपपन्नं स्यात्॥ यदा त्रयो भ्रा
तरस्तत्रैकपुत्रः॥ अन्यस्य द्वौ अपरस्य त्रयः तथा च सर्वे पितापुत्रेषु विद्यमानेषु पूर्वोक्तेच्छया वक्ता॥ यदा त्वेकपु
त्रसंततैर्पुत्राः पौत्रा आजीवंति पुत्रांतरसंततौ पुनः पुनः कियत्यो नाः एवं तदा जीवंत॥ पितापुत्रा द्रव्ये पि
तामहोपात्ते इत्यनेन न्यायेन पैतामहधनं लभंते॥ यदि द्वै पुत्रास्मृताः पौत्रा एव वर्तंते तदा पौत्रा एव स्वां
शान् लभंते॥ अनेकपितृकाणां तु पितृतो भागकल्पना॥ इत्यनेन न्यायेन न तु द्रव्ये पितामहोपात्ते इत्यनेन
न्यायेन तेषां प्रमीतपितृकत्वात्॥ अयं च विभागक्रमः॥ पितामहे मृत एव तस्मिन् अविद्यमाने पितरि द्वयं
पुत्रेच्छया वा विभागो भवति॥ न पौत्रेच्छया पितरि विद्यमाने पित्रेच्छया कचन पुत्रेच्छया वा विभाग इति विभा
गकालः॥ कथं न प्रस्तावनिर्दिष्टत्वात्॥ अथ मातृ अंशकल्पना॥ तत्र याज्ञवल्क्यः॥ यदि कुर्यात् समानंशान् प
त्न्यः कार्याः समांशिकाः॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥ समशाद्योऽनुनाधिभावरहितोऽंशपदः॥
क १

सम१ अथवांशशब्दोऽत्र चतुस्त्रिद्व्येकभागास्फुरत्यत्रांशपरं शास्त्रोक्तसमत्वात्॥ समत्वव्यपदेशः॥ एवं स्थिते यदा
पितास्वेच्छयापुत्रान्समांशभाजः करोति॥ यदापत्न्योपिसमांशकाः कार्याः॥ यदि ब्राह्मण्यादिषु त्वन्यपुत्रेण
सहशाएवं॥ तदातन्मातृणामपिसदृशाएव॥ यदामूर्द्धावसिक्तादिपुत्राणांयथाक्रमेणत्रिद्व्येकांशास्त चतुः
दातन्मातृणामपिस्वस्वपुत्रसमांशाः॥ एवंशास्त्रापवादः॥ नदत्तमित्यादि॥ स्त्रीधनमलंकारादि यदि स्त्री
धनंदत्तंतदादत्तेचेदंप्रकल्पयेदिति॥ इत्यवधिविदनप्रकरणोक्तप्रकाराविज्ञेयाः॥ सचप्रकारस्त्वर्धशब्दोंशसमा
नपरस्तेनसमविभक्तांशपरः॥ यावताधनेनस्वपुत्रांशात्स्यूनंनवति॥ स्त्रीधनं तावद्धनंदत्त्वापत्न्यंशोपि
पुत्रांशसमः कर्त्तव्यइति नत्वेवंसति अर्द्धांतरेणस्त्रीधनमपिविभज्यतामितिकंस्यात्तथाचस्त्रीधनस्या
विभज्यत्वप्रतिपादकवचनविरोधइति॥ नैवं यत्रापवादकंवचनमस्ति तत्रापवादकबलात्॥ सामा २९ शास्त्री॥
न्यस्त्रीधनस्याविभज्यप्रतिपादकवचनानांबाधः॥ यत्रापवादोनास्ति नबाधः॥ तत्रचनदत्तंस्त्रीधनंयासा

मितिदत्तेचेदंप्रतिकल्पयेदित्यनयोरर्थिकैकवाक्यत्वेनापवादकत्वं॥ यदात्तुपिताज्येष्ठस्याश्रेष्ठभागेने
त्याद्युक्तप्रकारेणविषमभागंकरोति तदापत्नीनांश्रेष्ठादिभागानसंति॥ किंतुश्रेष्ठादिभागोद्धारेकृते
यदवशिष्टंसमुदितद्रव्यंतस्मात्समानंशान्यपत्नीनां॥ तथास्त्रीकयोद्धारंच॥ तथाचापस्तंबः॥ परिभांड
चगेहेलंकारोभार्यायाइतिश्रोयकरणंह्यपडुपत्नस्थापनसूर्पादिपरिभांडंइत्युक्तं॥ पितरिमृतेभ्रा
पुत्रैःक्रियमाणेविभागेपिमातासमांशाएव॥ तथाचयोगीश्वरः॥ पितुरूर्द्ध्वंविभजतांमाताप्यंशंसमं
हरेत्॥ पितुरूर्द्धंपितृमरणानंतरं अत्रापिनदत्तंस्त्रीधनंयासांभर्त्रावाश्वसुरेणवा इतितयादत्तेचेदं
द्वयं३ प्रकल्पयेत्॥ इत्येतद्वाक्ययोज्यं॥ समानन्यायत्वात्॥ प्रतिषेधाभावाच्च॥ एवमेवविज्ञानेश्वरधारेश्वरादी
नामपिमतं॥ अथवादत्तेचेदंप्रकल्पयेत्॥ इत्यत्रार्द्धशब्दःसमविभागपरः॥ अतश्चस्त्रीधनेविमानेपुत्रांश द्य२
स्यार्द्धंदशनिष्कस्तपपुत्रांशस्यार्द्धंपंचनिष्कात्मकंदद्यादित्येकंभवति॥ भ्रातृभार्याणांयोलंकारःसोविभज्यएव॥ भा१

तथास्त्रिय एव यदा विभागाधिकारिण्यस्तदापि यस्यै यद्दित्सया प्रदत्तं दत्तं तदपि विभज्यमेव एतच्च
विभज्यप्रकरणे व्यक्तं ॥ भविष्यति यदा तु पितामहोपार्जितं धनं पितापुत्रौ विभज्य गृह्णीतः ॥ तदा पितामह
पत्नी सपुत्राप्यपूर्वोक्तरीत्या स्वस्वांशं लभते ॥ मातापि अंशसमं हरेदिति कथं चेत् ॥ पितामहोपार्जितद्रव्यत्वा
त् यदि पितामहपत्न्याः पुत्राः स्त्रियाः स्वालंकारं प्रीतिदत्तं लभते नांशं तथापैतामहधनविभागे मातांशेन
नं५ लभते ॥ किंतु स्वाभरणादिकमेव यदि कुर्याः समांशान्त ॥ पत्न्यः कार्याः समांशकाः ॥ तथा पितुरूर्ध्वं माताप्यं
शसमं हरेत् ॥ इत्यनयोः प्रबलपितृप्रधानकस्वाम्योपेतधनविषयत्वात् ॥ पितृप्रधानः स्वकस्वाम्यो
पेतत्वं चैवस्तेयं धनं पित्रा विभागजं प्रतिग्रहादिजिर्वीतस्य ताद्रूप्यमिति ॥ पितृधनं पुत्रगामीत्युक्तं
मातृनिधनिको धाधिक्रियत इत्याकांक्षायामाह ॥ याज्ञवल्क्यः ॥ मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः ॥ मा २एताश्री॥।
तृकुलवैर्णापाकरणानंतरं यदवशिष्टं मातृधनं तं दुहितरो विभजेरन् गृह्णीयुः ॥ तत्रायं विशेषः ॥ विवाहिता

कृ१ त दि२

वा१ विवाहितदुहितृदुहितृसद्भावेऽपि विवाहिता एव गृह्णीयुः ॥ अविवाहिता नामनाथे स्तिवाहिता विवा
तदुहितृमध्ये याः दरिद्रा दुहितरस्ता एव गृह्णीयुरिति ॥ तत्र गौतमः ॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्रति म२
वा२ ष्ठितानां चेति ॥ अप्रत्ता अविवाहिताः ॥ अप्रतिष्ठिता दरिद्राः ॥ ताभ्यक्ता दुहितृभ्यो विना पुत्र्यभावे दुहि
त४ त्रसत्वे नावद्यत्वं वयसा पुत्रादि गृह्णीयां दुहितृतस्तत्स्वं तत्वितित्यर्यमर्थः ॥ उत्तरश्लोकार्थः ॥ ता
अर्थं निपत्य स्त्रीग्रहणाधिकारः ॥ तत्र याज्ञवल्क्यः ॥ अतीतायामप्रजसि बांधवास्तदवाप्नुयुः ॥ अप्र
कृ४ जस्त्रीधनं भर्तुः ब्राह्मणादिचतुर्ष्वपि ॥ दुहितॄणां प्रसूता चेत् शेषेषु पितृगामितत् ॥ ततस्त्रीधनं प्रजस्य म४
पत्यरहितायां दुहितृदौहित्रपुत्रपौत्ररूपापत्यरहितायां स्त्रियां मृतायां बांधवा भर्त्रादयः ॥ गृह्णीयुः ॥
ब्राह्मदैवार्षप्राजापत्यविवाहसंस्कृतायां नार्यां मृतायां तद्धनं भर्त्ता गृह्णाति तदभावे तत्प्रत्या
प्रत्यासन्नतरास्ते गृह्णीयुः ॥ तदभावे पितृकुले ये प्रत्यासन्नास्त इति विवेकः ॥ शेषेषु आसुरगांधर्वराक्ष

सपैशाचेषु विवाहेषु नार्या वै प्राप्यां मृतायां धनं पितरौ मातरौ स्वृद्धीतः प्रथमं माता तत् तदनावे पिता तद
नावे पितृकुलप्रत्यासंन्ना बांधवा तदनावे नर्तृकुले ये प्रत्यासंन्नास्ते रदृद्युः सर्वेष्वपि विवाहेषु यदि
साप्रसूता न दा दुहितृणां दुहितृदुहितृणां दौहित्रीणां अनंतु दुहितृशब्देन सर्वा दुहितृ निधाने मातुर्दु
हितरः शेषमित्यनेन पौनरुक्त्यं स्यात् ॥ दौहित्रीष्वप्यूढानूढा समवाये प्रतिष्ठिताप्रतिष्ठितसमवाये
च प्रतिष्ठिते ति त्येवं दौ दौहित्रीणां निःस्वमातृणां विषमसंख्यकानां समवाये मातृद्वारा विनागः यद
ह गौतमः ॥ पितृमातृवास्वर्ग्ये नागविशेषः इति ॥ दुहित्रीणां दौहित्रीणां च वि[illegible] द्यमानत्वे दौहित्राणां प्रीत्या
किमपि दातव्यं ॥ नांशदानं ॥ तथा च मनुः ॥ यास्तासां स्याद्दुहितरस्तासामपि यथार्हतः ॥ मातामह्या धनात्कि
चित्प्रदेयं प्रीतिपूर्वकं ॥ तासां दुहितृणां दुहितरः दौहित्रीणामनावे दौहित्रा यथाह नारदः ॥ मा दौहित्रीणां
तुर्दुहितरोऽनावे दुहि[illegible]तॄणां तदन्वये मातुरुई नं दुहितरः ॥ आपुत्र्याः ॥ तदनावे तु दुहित्रीणां तदनावे त

दन्वये जाता दौहित्रास्तेषामित्यर्थः ॥ तदन्वय इति प्रथमविनक्त्यंतोऽपि पाठः ॥ तथापि दौहित्रा एव
गृह्यंते ॥ तेन दौहित्रसंततिः ॥ तस्य दौहित्रापेक्षया विप्रकृष्टत्वात् ॥ दौहित्राणामनावे मातुर्दु
हितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥ इत्यन्वयः ॥ शंखोपात्ता पुत्रपौत्रादयः क्रमेण धननाजः ॥ अने
नैवाभिप्रायेण मनुः ॥ जनन्यां संस्थितायां तु समं सर्वे सहोदराः ॥ नजेरन्मातृकं रिक्थं नगिन्यश्च सनानयः ॥
सनाभयो नगिन्यः साक्षान्मातृदुहितरः ॥ तदनावे तद्दौहित्रपर्यंतास्तदनावे सहोदराः ॥ मृतायाः सा
क्षात्सुतान् सपत्नीपुत्रा ॥ तदनावे पौत्रादयः ॥ यस्य वचनस्य तात्पर्यार्थः ॥ समं सर्वे सहोदरा इत्यत्र च सहोद
रग्रहणं भिन्नोदरनिवृत्त्यर्थं स्वपुत्रानावे सपत्नीपुत्रादयः ॥ यदा तु सा पत्युर्दुहिता तु च समजातीया भप
त्नेपुत्रस्य हीनजातीयस्तदोत्तमजातीया दुहितैव गृह्णाति ॥ तदनावे तादृग्विधदौहित्र एव ॥ तथा च मनुः ॥
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ॥ ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥ स्त्रीधनं स्यादपत्यादेदि

त्फलं॥ स्वपेक्षया स्त्रीपत्न्यैव कन्यका ततश्च स्त्रीकन्यकाशङ्कायाः प्रतियोगित्वं च नावाना सापत्न
माता सापत्नदुहितेति न्यवगम्यते। ब्राह्मणीत्यनेन जातिप्रदर्शनार्थं चतः क्षत्रा स्त्रीधनं ब्राह्मणी
क्षत्रियावैश्याकन्यकाचरन्ति॥ एवं वैश्याधनं ब्राह्मणीक्षत्रियावक्षत्रियास्त्रीधनं ब्राह्मणीति। अत्रो
या त्तमजातीयाएव सपत्नकन्यकाया धनग्रहणनिधानात्॥ हीनजातीयपत्नीदुहितॄणामुत्तमजाती
यासपत्नीपुत्रसद्भावे धनग्रहणं नास्तीति॥ गम्यात पुत्र एपौत्रा नावेतस्तु ताइत्येवं क्रमेणचाग्नादयो
ल॰ ४ धनभाजः॥ एतश्चस्त्रीधनं स्तुंव्यतिरिक्तमेव विनाज्यं ऊर्ज्ञं उसोभरा एवरक्कीयु॥ तथा च गौतमः॥
भगिनीशुल्कं सौदर्याणां ऊर्ध्वं मातुरिति दुहित्रादिषु पौत्रपर्यन्तेषु विद्यमानेष्वपि स्वभगिनीशुल्कं
सहोदरा एव हरेयुरित्यो ध्योन्यथा ध्यायं॥ वाग्दाकन्यां दत्वा तस्मिन्नदोषाभावे पितामह रन्नन्यतिक्रांप्य २०७॥श्री॥
णाद्यनुसारेण दंडनीयो राज्ञा॥ वाग्दाननिमित्तं यद्वरेण तत्पित्रादिना वा व्ययीकृतं तत्सकलमपि सवृद्धिकं व
लर्थः॥ स्त्रीधनप्रसंगाद्वाग्दत्ताविषयं किंचिदुच्यते। याज्ञवल्क्यः। दत्वा कन्यां हरन्दंड्यो व्ययं दद्याच्च सोदयं। मृतायां
दत्तमादद्यात्परि २

रायदेयं॥ वाग्दत्तं विवाहात्पूर्वं यदि म्रियते तदा यत्पूर्वं दत्तं मंगलीयादि शुल्कं तावद्वर आददीत। किंच
वाउजनयव्ययं विशोध्य उभयोरात्मनः कन्याश्च वा तुल्य व्ययं परिशोध्य वाग्दाननिमित्तं न व्ययं च
यीकृतं धनं तस्मादंगुलीयकादि रूपा कन्याधाना कृतविधावशिष्टं वरएवाददीत॥ यत्तु कन्यायै वाग्दा
नसमयात्पूर्वं प्रीत्या मातामहपित्रादिनि तस्यास्त्वत्वं तच्चासमर्पितं॥ शिरोभूषणादितद्भूषणे विशे
षमाह॥ बौधायनः॥ रिक्थं मृतायाः कन्याया ग्रहीयुः सोदरास्तदा। तदा भावे भवेन्मातुस्तदभावे भवेत्पितुरिति
प्रशस्तास्त्रियां जीवंत्यामपि किंचिदुच्यते। योगीश्वरः॥ दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके॥ गृहीतं स्त्री ति४
धनं भर्ता नाकामो दातुमर्हति। धर्मकार्ये आवश्यककर्तव्ये संप्रतिरोधके बंदीग्रहणे नियन्तदौ लभ्य
यांतरे भोक्ता भर्ता स्त्रीधनं गृहीत्वा पुनस्तस्मै तद्धनं दातुं नार्हतीति। अवश्यं दातव्यमिति नियमो नास्ती
त्यर्थः। प्रकारांतरग्रहणे दातव्यमेवं भर्तुरेकस्य लेखनं भर्तृतानां पांजीवंतीनां भर्तृतासां ये तद्धरेयुस्तवांध

न॥ तान्शिष्याद्घोरदंडेन धार्मिकः पृथिवीपतिरिति दंडविधानात्॥ स्त्रीधनस्य स्वरूपमप्याह॥ याज्ञवल्क्यः॥
पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं॥ आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितं॥ बंधुदत्तं तथा शुल्कं
मन्वाधेयकमेव च॥ अध्यग्न्युपागतं॥ विवाहकाले अग्निसन्निधौ मातुलादिभिर्दत्तं॥ आधिवे॥ अधिविन्नस्त्रि दनिर्दूर२
स्त्री४ ये देयादाधिवेदनिकं समं॥ न दत्तं धनं यस्यै तावद्देयं इत्युक्तं॥ यस्या उपरि विवाहं कुर्यात्॥ सा
अधिविन्ना सैवासौ स्त्री च अधिविन्नस्त्री तस्यै अधिवेदननिमित्तं धनं साधिवेदनिकं॥ तत्समं दद्यात्॥ यावद
धिवेदनाय संकल्पितं तावत्सर्वास्त्रियै दद्यादित्यर्थः॥ अत्र विशेषमाह॥ न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं
तत्र स्यादर्थो विहितो मातरं शास्त्रकथनप्रस्तावे अधिवेदनिकाद्यं च॥ आद्यशब्देन कर्तृतन्तुः यस्य विभागप
रियद्दनिधाधिगमादिप्राप्तस्य च्यात॥ कात्यायन॥ विवाहे यस्त्री नोदीयात्तदग्निसन्निधौ तद्ध्यग्नि २०॥श्री॥
कृतं सद्भिः स्त्रीधनं परिकीर्तितं॥ यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्॥ अध्यावहनिकाद्यं च स्त्री

धीत्यादत्तं उयत्किंचिद्श्वश्वा वा श्वशुरेण वा। पादवंदनिकं चैव

धनं तदुदाहृतं॥ प्रीतिदत्तं तदुच्यते॥ कन्यया कन्यया वापि पत्युः पितृगृहे पितुः॥ भ्रातुः सकाशात्पित्रो
र्वा लब्धं सौदायिकं स्मृतं॥ विवाहात्परतो यच्च लब्धं भर्तृकुले स्त्रिया॥ अन्वाधेयं तदुक्तं च लब्धं पितृकु
लात्तथा॥ इति॥ अथ विभक्तस्य स्वर्यातस्य पुत्रपौत्ररहितस्य दायग्रहणाधिकारिक्रमः॥ तत्र याज्ञवल्क्यः॥
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा॥ तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः॥ एषामभावे पूर्वस्य
व५ धनभागुत्तरोत्तरः॥ स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥ परिणीता रहिता संस्कृता एवं वचनं दुःला
एकयात्र तत्र यदा हे वद्धः सवर्णाः असवर्णा वा ताः सर्वा दुहितरः यथाक्रमेण भागः स्फुरितानेन क्रमेण वि
भक्तो न्यथनं हरंति॥ पत्न्यभावे दुहितरः॥ तथा च कात्यायनः॥ पत्नी भर्तुर्धनहरी या स्यादव्यभिचारि
णी॥ तदभावे दुहिता यद्यनूढा भवेत्तदा॥ यद्यनूढा भवेदिति॥ विशेषोपादानादूढानां समवाये
अनूढैव हरति॥ ऊढानूढपित्रभावे सपत्नी स्त्रीधनं दुहितॄणां अप्रतिष्ठितानां चेति॥

गौतमवचनान्न्यायस्य पित्र्यधनेपि समानत्वात्॥ दुहितॄणामभावे दौहित्रो धनभाक्॥ यदाह विष्णुः॥ अपुत्रपौ
त्रसंताने दौहित्रा धनमाप्नुयुः॥ पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः॥ अयमर्थो धारेश्वरेण व्युत्पा
त॰१२ नापि दुहितरश्चैवेत्यत्र चकारेण द्योतितः॥ दौहित्रस्याप्यभावे पितरौ धनभाजौ॥ माता पिता च पितरौ॥ त
त्रैकशेषात्क्रमाप्रतीतावपि एकवाक्ये क्रमप्रतीतिर्विग्रहवाक्यक्रमोनुसर्तव्यो दायग्रहणे पितरश्च प्रथ
मं माता रिक्थभागिति तदभावे पिता एतच्च यथा पत्नी दुहितरश्चेत्यस्मिन्श्लोके वाक्यसंदर्भे योयं क्रमो धन
भाजां तत्र तत्र स्थितिवाक्यशेषे लिखितं तत्सकलमपि तथैवेत्यस्माभिरुपपादितं मिताक्षराटीकायां सुबो
धिन्यां व्यवहाराध्याये विस्तरभयान्नेह लिखितं॥ पित्रभावे भ्रातरस्तत्रापि प्रथमं सहोदराः सहोदराणां
भिन्नमातृकत्वेन सन्निकर्षात्सहोदराणामभावे भिन्नोदराः॥ सन्निकर्षविशेषादेव धनग्रहणं स्मर्य ३०२॥श्री॥
ते॥ अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेत्॥ इति सपिंडाद्योंतरः सन्निहितः प्रत्यासन्नः शरीरबंधेन तस्य प्र

तस्य१ नं१

सन्नस्य धनं सपिंडस्य धनेन वेदितव्यं॥ उक्तन्यायविधया भ्रातॄणामभावे तत्सुताः॥ भ्रातृपुत्राः तत्रापि प्रथमं सोद
रभ्रातृपुत्राः तदभावे भिन्नोदरभ्रातृपुत्राः यदा त्वेकस्मिन्भ्रातरि मृते तद्धनं पत्नी दुहितरश्चेत्यनेन न्याये
न भ्रातृसंबंधत्वेन प्राप्तं॥ प्राप्ते तद्धने विभागात् पूर्वमेवैको भ्राता मृतः॥ तत्पुत्राः संति तदा तत्पुत्राणां
पितृतो भागकल्पनेन न्यायेन पितृभागोस्त्येव॥ तत्पितृद्वयनश्चरणीकारानंतरमुक्तं चात्र॥ भ्रातृपुत्राभावे गो धि४
त्रजा धनभाजः॥ गोत्रजा इत्यनेन पितामही पितामहः प्रपितामहः प्रपितामहपुत्राः॥ तत्पुत्राश्च तदा
विप्रपितामहादयस्तेषामप्यभावे समानोदकाश्चेत्यस्यांत॥ तत्रायं क्रमः॥ भ्रातृपुत्राभावे पितामही
तस्याभावे पितामहः॥ यथा मातुरनंतरमेव पितुरधिकारस्तथा पितामह्यनंतरं पितामहस्याधिकारः
पितृभावे भ्रातृगामित्वं पितामहस्याभावे पितृव्याः तत्रापि सोदरभिन्नोदरव्यवस्था पूर्ववदेव साक्षा
त्पितामहीपुत्राः प्रथमं धनभाजस्तदभावे तत्सुताः तदभावे प्रपितामहीपुत्रास्तेषामप्यभावे भ्रातृपुत्रः॥

ये न पितृव्यपुत्रास्तेषामभावे प्रपितामही तस्या अभावे प्रपितामहस्तदभावे प्रपितामहपुत्रास्तत्पुत्राश्चाप्येनैव तदभावेन
सुता इत्येवं सप्तमपुरुषपर्यंतं विदितव्यं एवं समस्तपुरुषाधिकसपिंडाभावे समानोदकाः॥ तत्रापि पूर्वौक्त
रीत्यादि सति विशेषो द्रष्टव्यः॥ गोत्रजानामभावे बांधवो धनग्रहणाधिकारिणः॥ त्रिविधा हि बंधवाः॥ आ
त्मबांधवाः पितृबंधवो मातृबंधवश्चेति॥ यथोक्तं वृद्धशातातपेन॥ आत्मपितुः स्वसुः पुत्राश्चात्ममातुः स्व
सुः सुताः॥ आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः॥ पितुः पितृस्वसुः पुत्रा मातृमातृस्वसुः सुताः॥ पितु
र्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः॥ मातुः पितृस्वसुः पुत्रा मातुर्मातृस्वसुः सुताः॥ मातुर्मातुलपुत्राश्च
विज्ञेया मातृबांधवा इति॥ तत्रापि प्रथममंतरंगत्वात्पाठक्रमेणात्मबंधवो धनभाजः तदभावे तथैव पितृबां
धवाः॥ तदभावे तथैव मातृबंधव इति क्रमः॥ बंधूनामप्यभावे आचार्यस्तस्याभावे शिष्यः तथा चापस्तं २०३॥श्री॥
बः॥ पुत्राभावे यः प्रत्यासन्नः सपिंडस्तदभावे आचार्योऽभावेंतेवासीति॥ शिष्याभावे सब्रह्मचारी एकाचार्यो

आचार्य१

पनीतोध्यापितो वा सब्रह्मचारिणामप्यभावे श्रोत्रिया धनभाजः॥ यदाह गौतमः॥ श्रोत्रिया ब्राह्मणस्या
नपत्यस्य रिक्थं भजेरन्निति॥ एकशाखाध्यायी श्रोत्रियः तस्याप्यभावे ब्राह्मणमात्रं समीपस्थं तं गृह्णीत॥ त
था च मनुः॥ सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः॥ त्रैविद्याः शुचयो दांतास्तथा धर्मो न हीयते॥
इति॥ ब्राह्मणद्रव्यं कदाचिदपि राजा न गृह्णीयात्॥ तथाह नारदः॥ ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न क
श्चन॥ ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथा॥ मनुः॥ अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः॥
क्षत्रियादिधनं सर्वं ब्रह्मचारिपर्यंतानामभावेपि न ब्राह्मणो गृह्णीयादपि राजैव गृह्णीयात्॥ यदाह
मनुः॥ इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः॥ इति एवं पुत्रादिक्रमेण दायग्रहणप्रकारं सर्वं प्राज्ञे २२
क्वचिदपवादमाह॥ याज्ञवल्क्यः॥ वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः॥ क्रमेणाचार्यसच्छि
ष्यधर्मभ्रात्रेकतीर्थिनः॥ ब्रह्मचारी नैष्ठिको नोपकुर्वाणकः॥ सच्छिष्यः अध्यात्मशास्त्रश्रवणमननादि

दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च ॥६

पितुः धर्मभ्राता भ्रातृत्वेनांगीकृतः॥ एकतीर्थी एकाश्रमी वानप्रस्थ एव॥ स्वाश्रमनिकटवासी धर्मभ्राता वा
च२ एकतीर्थी॥ अत्र क्रमशब्दः प्रतिलोमक्रमाभिप्रायः॥ वानप्रस्थस्य धनं आचार्यो मासस्य यत्सं वा तथा वत्सर सं२
स्य वा अर्थस्य निश्चयं कुर्यात्॥ कतमात् स्थयुजेत्यादि दित्यनेन प्रकारेण यदुपार्जितं तदनादिरूपं वस्तु
धर्मभ्रात्रैकतीर्थी गृह्णाति॥ यतेर्धनं वस्त्रपुस्तकादि सच्छिष्यो गृह्णीयात्॥ नैष्ठिकब्रह्मचारिणो धनं सा
दिकमाचार्यो गृह्णीयात्॥ ॥अथ संसृष्टिविभागः॥ तत्र याज्ञवल्क्यः॥ संसृष्टिनस्तु संसृष्टी सोदर
स्य तु सोदरः॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्॥ असंसृष्ट्यपि वादद्यात् संसृष्टो नान्य
मातृजः॥ इत्येवं विभक्तं पुनरपि मिश्रीकृतं धनं संसृष्टं संसृष्टमस्यास्तीति संसृष्टी॥ तस्य मृतस्य॥ पु
त्रपौत्ररहितस्य धनं पत्न्यां विद्यमानायामपि अपरः संसृष्टी गृह्णीयात्॥ संसृष्टीत्येकवचनमविवक्षि ३०४॥श्री॥
या२ तं॥ अतः संसृष्टिसंसृष्टिनो रविभज्य गृह्णीयुः॥ तत्र पत्न्याश्च पोषणं कुर्युः॥ संसृष्टित्वं पित्रा भ्रात्रा पितृव्येणाप्यन्यत भ्रा२१

च१

तमेनैव नान्येन॥ तदाह बृहस्पतिः॥ विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः॥ पितृव्येणाथ वा प्रीत्या
स यः संसृष्ट उच्यते॥ यदि विज्ञातगर्भायां मृतपत्न्यां संसृष्टित्वात् संसृष्टिनस्तद्धनं विभज्य गृह्णंति॥ पश्चा
त्तस्मादेव गर्भात्पुत्र उत्पद्यते तदा मृतसंसृष्टिधनं तत्पुत्रस्य दद्युः एवं बहुतरेषु भ्रातृष्वपि विशेषं॥ सोद
रस्य तु सोदरः॥ संसृष्टिनो धनं संसृष्टिमात्रं न गृह्णाति किं तु सोदरस्यैव भ्रातुर्जन्यस्य धनं सोदर एव
गृह्णाति न भिन्नोदरः॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्॥ असंसृष्ट्यपीत्यनेन वा कोनैतदु
क्तं भवति सापत्न्यभ्रातुः संसृष्टित्वमेव धनग्रहणे हेतुरिति॥ असंसृष्ट्यपीत्येतत्पदं काकाक्षिवदुभयत्रा च४
न्वेति॥ ततश्च असंसृष्ट्यपि वा दद्यात् संसृष्ट इत्येतत्पदं को वा क्यांतरं॥ असंसृष्ट्यपि विभक्तधनस्य पुनर्मि
श्रीकरणरहितोऽपि संसृष्ट एकोदरसंसृष्टसोदरः संसृष्टिनो मृतस्य धनमाददीत॥ अनेन वासंसृ
ष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं हेतुरित्युक्तं भवति॥ अत्र चासंसृष्टपदं पूर्ववदुत्तरेणापि सं

वध्यते। तत्र संसृष्टो नान्यमातृजं हृत्येतदपरं वाक्यं॥ अस्मिन्वाक्ये संसृष्टशब्देन संसृष्टी निधीयते
न सोदरः॥ संसृष्टसंसृष्ट्यपि अन्यमातृजो॥ भिन्नोदर एव धनं गृह्णीयात्॥ अत्रैवं कारामन्तु वचनानुसा
राणामुक्तं॥ एतदुक्तं भवति॥ यत्रासंसृष्टो भ्रातादरः संसृष्टी च भिन्नोदरः तत्र सोदरः॥ तत्र सोदर
त्वे हेतोर्विद्यमानत्वात् सोदरोप्यंशं लभते। संसृष्टिहेतोर्विद्यमानत्वाद्भिन्नोदरोपि लभते॥ इति मनु
रपि विभक्ताः सहजीवंति विभाजयेन्पुनर्यदि॥ समस्तत्र विभागः स्यात् ज्येष्ठ्यं तत्र न विद्यते॥ ज्येष्ठ
स्य विंशउद्धारः॥ सर्वद्रव्याश्च यद्वरमित्यादिनोक्तं विषमविभागः त्वकं कर्मीत्तीतार्थः तथा येषां ज्येष्ठः क
निष्ठो वा हीयेतांशप्रदानतः॥ म्रियेतान्यतरो वापि तस्य भागो न लुप्यते॥ येषां संसृष्टिनां भ्रातॄणां
मध्ये अन्यतरो ज्येष्ठः कनिष्ठो मध्यमो वा अंशप्रदानतो अंशप्रदाने विभागसमये हीयेत स्वकीयां रु०व्या०श्री॥
शात्॥ च्यवेतान्निवर्तेत॥ आश्रमांतरस्वीकारेण पातित्यादिना वा अथ म्रियेत तस्य भागो न लुप्यते॥ अत

एवं तद्भागं पृथगुद्धृत्य स्थापयेन्न विभजेयुरित्यर्थः॥ ॥उद्धृतस्य विनियोगप्रकारमाह॥ सो
दर्या विभजेयुस्तं समेत्य सहिताः॥ समं भ्रातरो याश्च संसृष्टा भगिन्यश्च सनाभयः॥ वाक्यद्वये सोदर्या
३।३ भ्रातर इति च पदद्वयोपादानात्सोदर्या इह नैकोदराः॥ भ्रातृशब्देन च भिन्नोदरा अभिधीयंते॥ अन्य
था वैयर्थ्यापत्तेः भ्रातरो याश्च संसृष्टा इत्यत्र संसृष्टपदोपादानात् भ्रातृयोगि न तु सोदर्या विभजे
युरित्यत्र च संसृष्टपदानुपादानात्सोदर्या असंसृष्टा इति गम्यते॥ अतोयं श्लोकस्यायमर्थः॥ तद्ध
नमंशं सोदर्याः सहोदरा असंसृष्टा अपि समेत्य देशांतरं गता अप्यागत्य सहिताः संभूय समं न्यूना पा४
धिक्यभावरहितं यथा भवति॥ तथा विभजेयुः॥ तथा भ्रातरो भिन्नोदराश्च समानजातीयाश्च ये संसृ
ष्टास्ते च तथा सनाभयः॥ सहोदर्या भगिन्यश्च॥ एते सोदर्यप्रभृतयो भगिन्यंताः सर्वे समं विभजे
युरित्यर्थः॥ असमानजातीयानां भिन्नोदरसंसृष्टिभ्रातॄणां उक्तत्रिद्व्येकभागाः कल्पित

स्य बाधकाभावात्॥ संसृष्टानां त्वाह॥ अनपत्यस्त्रीया कश्चिच्चेत्प्रव्रजेत वा॥ विभजेरन् धनं तस्य शेषास्ते स्त्री
धनं विना भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्॥ रक्षंति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु च॥ इत
रासु शय्यामरक्षंतीषु तु स्यात्॥ संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाधिकं॥ प्राप्नोति तस्य दात
व्योह्यंशः शेषाः समांशिनः॥ अंशदानं तदधिकधनप्राप्तौ वदितव्यं॥ अत्र चायं निर्णयार्थः॥ [illegible]
दरसंसृष्टिभ्रातृभावे सोदराणां मध्ये यः संसृष्टी सोदरः स एव सोदरस्य संसृष्टिनो पुत्रस्य मृतस्य ध
नं गृह्णाति॥ अत्रापि समानजातीया॥ समानजातीयभिन्नोदरभ्रातृषु चतुर्ष्व्वेकभागा इत्यनुसं
धेयं॥ यदा सोदरा असोदराश्च संसृष्टिनस्तदा तत्सर्वे गृह्णीयुरिति॥ सर्वोत्तिर्यथा यदा संसृष्टाः सो
दराः संसृष्टाश्च भिन्नोदराः तथापि सोदराश्च गृह्णीयुः॥ यदा संसृष्टा भिन्नोदराः संसृष्टाश्च सोदरा- २०दायभा॥
स्तदा सोदरा एव॥ सोदराणां मध्ये केचन संसृष्टा केचन तदा संसृष्टा असोदरत्वरूपेणेव वचनात् संसृ

ष्टिन एव गृह्णीयुरिति॥ सर्वत्र स्त्रीधनस्याभरणं वस्त्रं च तत्। एकमातृजत्वाभिन्नमातृजत्वरूपविशेषेण
भ्रातृषु येयं व्यवस्था दर्शिता॥ सा सापत्नपितृव्यस्यापि पितृव्येष्वपि योज्या न्यायस्य समानत्वादिति त्य२
केचन॥ तदनुपपन्नं सोदरस्य तु सोदर इति विधायकं वाक्यं॥ तत्र सोदरत्वस्यापि विवक्षा कारणं नास्ति।
सोदरस्य पदस्यापि पितृव्यापत्नवत्क्वचिदभावाच्चोक्तं न विरुद्धं वाच्यं॥ वचनविरोधन्यायस्तत्र न प्रवर्त्ते
त इति सर्वमनवद्यं॥ अथांशानर्हाः॥ तत्र याज्ञवल्क्यः॥ क्लीबोथ पतितस्तज्जः पंगुरुन्मत्तको जडः॥ अंधो
चिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः॥ तज्जः पतितादुत्पन्नः श्रेष्ठि जातोत्पन्नः पंगुः पादविकलः॥ उन्मत्तः प४
वातपित्तश्लेष्मसंनिपातग्रहावेशोत्पन्नेन रुन्मादैरप्रतिसमाधेयतयाविष्टः॥ जडोपि विकलचित्तः इ
ष्टानिष्टावधारणशक्तः इत्यर्थः॥ अचिकित्स्यरोगाः॥ अप्रतिसमाधेयराजयक्ष्मादिग्रस्ताः॥ आद्यशब्दे
न पितृद्वेष्यादयो गृह्यन्ते॥ तथाच नारदः॥ पितृद्विट् पतितः षंढो यश्च स्यादौपपातिकः॥ औरसा अपि

नैतेषांलनेरसक्षेत्रजाःकृता॥ वसिष्ठः॥ अनंशास्त्वाश्रमांतरगता॥ आश्रमांतराणि नैष्ठिकवान
प्रस्थोत्तमाश्रमाः॥ मनुः॥ अनंशौ क्लीवपतितौ जात्यंधबधिरौ तथा॥ उन्मत्तजडमूकाश्च ये च केचि
न्निरिंद्रियाः॥ व्याध्यादिना निर्गतमिंद्रियं यस्मात्स निरिंद्रियः॥ एते अंशभाजो न भवंति भरणं तु कर्त
व्यमेव॥ तथा च मनुः॥ सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा॥ ग्रासाच्छादनमत्यंतं पतितो ह्यद तो४
द्भवेत्॥ सर्वेषामंशानर्हाणां॥ अत्यंतं यावज्जीवं॥ एतेषामनंशत्वं विवाहात्पूर्वमप्रत्याख्येयदोषप्रा
प्तौ सत्यां नेतु विरक्तानां यदि विवाहकालादूर्ध्वं दुष्टो विवाहोत्तरकालमौषधादिना निर्दुष्टः प्राय
श्चित्तेन वा तदा विभक्तेषु सुता जाता सवर्णाद्वा विनां व्यनेनन्यायेनांश प्राप्तिरस्त्येव पतितादि गमागिर
षु पुत्रिंगमविवक्षितं तस्माद्दृश्यगताभ्यास अतो भार्यापत्नी दुहितृनाद्यो ऽपि दुष्टा अनंशाश्चाक्लीवादयस्त ३०७॥भ्री॥
वनंशानतत्सुत्राः॥ तथा च याज्ञवल्क्यः॥ औरसक्षेत्रजास्त्वेषां निर्दोषा भागहारिणः॥ सुताश्चैषां प्रभ

र्तव्या यावद्वै भर्तृसात्कृताः॥ अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः॥ निर्वास्या व्यभिचारिण्यः
प्रतिकूलास्तथैव च॥ क्लीवस्य क्षेत्रज एव पुत्रः इतरेषामौरसक्षेत्रजौ क्षेत्रजौरसक्षेत्रजयोर्ग्रहणा
दितरपुत्राणामंशो नास्तीति गम्यते॥ औरससमश्च पुत्रिकापि प्राप्नोति। साप्यौरसपदेनैव प्राप्ता
दुहितरस्तु भर्तव्या विवाहपर्यंतं॥ यथापि विवाहो कर्तव्यः॥ प्रतिकूलास्तथैव च निर्वास्याः परंप्र
तिकूलानां पोषणं कर्तव्यं॥ व्यभिचारदोषाभावात्॥ ॥अथाविभाज्यं॥ याज्ञवल्क्यः॥ पितृद्रव्याविरो
धेन यदन्यत्स्वयमर्जितं॥ मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्ध
रेत्तु यः॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ पितृद्रव्याविरोधेन पितृद्रव्याविनाशने। एतद्धर्मे च
नुपपन्नं॥ मैत्रं मित्रसकाशाल्लब्धं॥ औद्वाहिकं विवाहप्राप्तं॥ क्रमायातमन्यैरपहृतं पित्रादिना सामर्थ्या वं२
भावादनुद्धृतं यत्किंचिद्द्रव्यं पुत्रादीनां दायादीनामप्ययमेव साधयेत् अनुज्ञातः सन्नुद्धरत्यपह

न१ ईभ्यः सदाप्यादत्त्वा स्वधनं दद्यात्॥ स्वयमेवोद्धर्तुं शक्नुयात्॥ अन्यापहृतोद्धृतं स्वित्येतद्विशेषमाह॥ क्रमा॥
पूर्वैर्नष्टं तु यो भूमिमेकोऽद्धरेत्क्रमात्॥ यथा भागं लभन्तेऽन्ये दत्त्वांशं तु तुरीयकं॥ चतुर्थं भागमुद्धर्त्रे दि
त्वावशिष्टं चतुर्दृष्टं सहिताः सर्वे विभजेयुरित्यर्थः॥ अध्यापनवेदार्थव्याख्यानबोधयनादिलब्धं
विद्याप्राप्तं पितृद्रव्याविनाशेन लब्धं मैत्रादिधनस्याविभज्यत्व कथनात्॥ पितृद्रव्यविनाशेन लब्धमैत्रादि
धनस्य विभज्यत्वमुक्तं भवति॥ अत्र वचनोपात्तमैत्रादि विद्यालब्धांत धनानामपि पितृद्रव्याविरोधेने
त्येतद्विशेषणं अतः पितृद्रव्याविरोधेनापि प्रतिग्रहलब्धं विभजनीयमेव॥ तथा च शिष्टस्यारोहस्पते॥ नार
द॥ कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः॥ भागं विद्याधनात्तस्मात्स लभेताश्रुतोपि सन्॥ कात्याय
न॥ परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या॥ तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते॥ मनुः॥ अनुपघ्न २०८॥श्री॥
न्पितृद्रव्यं श्रमेण यदुपार्जितं॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ श्रमेण वा युद्धादिना॥

स्त्रियोऽन्याः तथा च॥ अंशाच्च दद्यात् पर्याप्तश्चाद्वैः समं॥ यच्च वचनांतरं अविभाज्यं सगोत्राणामासह
त२ स्रकुलादपि याज्यं क्षेत्रं च पत्रं च॥ कृतान्नमुदकं स्त्रियमिति तत् ब्राह्मण जातक्षत्रियादिपुत्रवि
षयं॥ न प्रतिग्रहभूर्देया क्षत्रियादि सुताय वै॥ इति विशेषस्मरणात्॥ याज्यं याजनलब्धं शौर्यादि
पुत्रविषयं॥ न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै॥ इति विशेषस्मरणात्॥ याज्यं याजनलब्धं
शौर्यादि प्राप्तमनाद्यमित्यर्थः॥ तत्रापवादमाह॥ व्यासः॥ साधारणं समाश्रित्य यत्किंचिद्वाहनायुधं॥
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥ साधारणं सद्भिः शपतद्व्यमाश्रित्य॥ याज्ञवल्क्यः॥ सामा
न्यार्थसमुत्थाने विभागोऽपि समः स्मृतः॥ समुदितार्थस्य वाणिज्यादिना संवर्द्धने॥ जातेऽपि सर्वेषां स
मएव विभागः॥ मूलस्य होनागावित्यर्थः॥ ॥अथ सर्वविभागशेषः॥ तत्र याज्ञवल्क्यः॥ अन्योन्याप
हृतं द्रव्यं विभक्तेयदि दृश्यते॥ तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः॥ विभागानंतरमन्योन्यापहृ

तं द्रव्यं भ्रातृसमैः सवांशैर्विभ... नेरं ... द्रव्यं विंशत्... रत्युतिविषमोद्धारक्रमेणेत्यर्थः॥ तथावि
भागनिह्नवे ज्ञातिबंधुसाक्षिलिखितैः॥ विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः॥ विभागनंतरं
कालांतरविभागे न ज्ञाते अपलापे ज्ञातिभिः पितृबंधुभिर्मातुलादिभिः साक्षि
भिर्लिखितेन विभागपत्रेण च विभागस्य भावना निर्णयो विज्ञेयः॥ तथा यौतकैः पृथक्कृतगृहक्षेत्रै
श्च विज्ञेयः॥ पृथक्कृष्यादिप्रवर्त्तनेन पृथक् पंचमहायज्ञाद्यनुष्ठानेन च विज्ञेय इत्यर्थः॥ नारदः॥
विभागसंदेहे दायादानां विनिर्णयः॥ ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्त्तनात्॥ भ्रातृणामविभक्ता
नामेको धर्मः प्रवर्त्तते॥ विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथक्॥ साक्षित्वं प्रतिभाव्यं च दानं ग्र
हणमेव च॥ विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथंचन॥ तथा॥ यद्येव ज्ञाता बहवः पृथग्धर्माः पृ २१०॥श्री॥
क्क्रियाः॥ पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः॥ स्वभागानपि दद्युस्ते विक्रीणीयुरथापि वा॥ कुर्यु

र्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै॥ बृहस्पतिः॥ विभक्ता अविभक्ता वा दायादाः स्थावरे समाः॥
एको ह्यनीशः सर्वत्र दानाधमनविक्रये॥ अथ मनमाधिकरणं॥ इत्थं व्यवहारसौख्य... यभिप्रायेण
न च पृथक्स्वभावानभिप्रायेण विभागानेव पृथक्पृथक्॥ स्वभावात्॥ ॥ इह मदनपारिजातमद
नविजितिपालदानज... स्तबकस्तृष्टम आसीदामोदाच्च पंडितभ्रमराः॥ मतिर्येषां शास्त्रे
प्रकृतिरमणीयाच्च वहति॥ पराशी... जगति... विशेषे॥ विरंचित्वे तेषां मुकुरतल
तस्थितिमियादियं चासार... प्रवर... निशिघ्नस्य जगति॥ ॥ इति पंडितपारिजातकमनद्धारमने
त्यादिविरुदराजी विराजमानस्य श्रीमदनपालविरचिते... ॥ ... ॥ अर्जितावर्णा हि२
श्रमधर्माः॥ अथेदानीं निष्कर्मजनितदुरितापहारणहेतुभूतः॥ प्रायश्चित्तापरपर्यायो नै
मित्तिकधर्मोभिधीयते॥ तत्र तावत्प्रकरणार्थपापकर्मफलादीनि प्रदर्श्यंते॥ हारीतः॥ अनद्या

न्हणमोज्यनोजनं अपेयपानमयाज्य याजनमसत्प्रतिग्रहः परदाराभिगमनं परद्रव्यापहरणं प्रा
णहिंसा चेति शारीराणि पारुष्यमनृतं विवादः क्रयविक्रयश्चेति वाचिकानि परपरितापनं पराभिद्रोहः
क्रोधो लोभो मोहोऽहंकारश्चेति मानसानि। तदेतान्यष्टादश निरयाणि कर्माणि यस्मिन्न्यासि त्वयसिद
कर्माणि करोति। अनाश्रमानि तस्मिंस्त्वयसि शरीरवाचिकमानसान्याप्नोति। एवं स्यात्। यस्यां यस्या
मवस्थायां यत्करोति तज्जन्मनो। तस्यां तस्यामवस्थायां शरीरेण तु शारीरं वाङ्मयेन तु वाङ्मयं॥ मा
नसं मनसा चैव स्वकर्मफलमश्नुते॥ मनुः॥ चातुर्वर्ण्यस्य कृत्स्नोयमुक्तो धर्मस्त्वयानघ। कर्मणां फलनि ५४
र्वृत्तिं शंस नस्तत्त्वतः परां॥ स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः। अस्य सर्वस्य शृणुत कर्मयोग
स्य निर्णयं॥ शुभाशुभफलं कर्म मनोवाग्देहसंभवं। कर्मजा गतयो नृणामुत्तमाधममध्यमाः। तस्येह त्रि
विधस्यापि त्र्यधिष्ठानस्य देहिनः। दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकं॥ त्रिविधस्योत्तममध्यमाध ३११॥श्री॥